National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2025;** 1(60): 105-106
© 2025 NJHSR
www.sanskritarticle.com

**ज्ञानेश्वर पाण्डेय**
विभागः – सर्वदर्शनम्,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नई दिल्ली

**Correspondence:**
**ज्ञानेश्वर पाण्डेय**
विभागः – सर्वदर्शनम्,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नई दिल्ली

# श्रीरामानुजमते श्रीनिम्बार्कमते च समन्वयाधिकरणस्य विमर्शः

**ज्ञानेश्वर पाण्डेय**

**प्रस्तावना-**

भारतीयदर्शनेषु वेदान्तदर्शनस्यान्यतमं स्थानमस्ति। वेदान्तशब्दस्य सामान्यार्थोऽस्ति वेदस्यान्तिमं भागः। सामान्यतो वेदस्यान्त्य भागेन उपनिषदां ग्रहणं भवति। उपनिषत्सुत्स्वा आत्मज्ञानस्य चर्चा अस्ति, अत उपनिषद् वेदान्तशब्दस्य पयार्यो वक्तुं शक्यते यतोहि उपनिषद् वेदान्तदर्शनस्याधारभूता वर्तते अत एव प्रस्थानत्र्य्याम् तस्या गणना वर्तते।

भारतीयदर्शनस्य पर्यवसानं वेदान्तदर्शने भवति। अतो वेदान्तदर्शनस्य स्थानम् उत्कृष्टतमं वर्तते। वेदान्तदर्शनस्य कालान्तरे बह्वयः शाखारभूवन् अभूत्, यथा अद्वैत-विशिष्टाद्वैत-द्वैताद्वैताश्चेत्यादयः।

अस्मिन् शोधपत्रे श्रीरामानुजाचार्येण श्रीनिम्बार्काचार्येण च प्रवृत्तयोः विशिष्टाद्वैतवाद-द्वैताद्वैतवादयोः समन्वयाधिकरणविमर्शो भविष्यति।

**प्रमुखशब्दाः -** उपनिषद्, ब्रह्म, वेदान्त, समन्वयः।

**निम्बार्कमते समन्वयाधिकरणस्य विमर्शः-**

प्रथमो निम्बार्कमते समन्वयाधिकरणस्य विमर्शो मया क्रियते। अस्मिन् अधिकरणे एकमेव सूत्रं वर्तते। अस्मिन् सूत्रे पदत्रयं वर्तते (तत्, तु, समन्वयात्) अत्र "तु" शब्दः शङ्कानिवृत्त्यर्थं वर्तते। यतोहि परमपुरुषार्थरूपं ब्रह्मैव शास्त्रैकवेद्यं वर्तते। अत एव ब्रह्मैव शास्त्रैकप्रमाणकमस्ति इति सूत्रस्य सामान्यार्थः। सूत्रस्य "तत्" पदेन शास्त्रप्रमाणकत्त्वेन ब्रह्मसम्भवत्येव इति सिद्धम् अर्थात् शास्त्रं ब्रह्मणः प्रतिपादनं करोति, अतो ब्रह्मणि केवलशास्त्रमेव प्रमाणमस्ति। शास्त्रव्यतिरिच्य किञ्चिदपि अन्यद्प्रमाणं नास्ति।

तदनन्तरं तृतीयपदम् **"समन्वयात्"** शब्दस्य व्याख्या आचार्यः करोति। परमपुरुषार्थरूपेण अन्वय एव समन्वयोऽस्ति अर्थात् शास्त्रं ब्रह्मणः परमपुषार्थरूपेण प्रतिपादनं करोति। **"निखिलदोष गन्धाघ्रातमाहात्म्ये सार्वज्ञ्याद्यनन्तगुणनिलये मुक्तोपसृप्ये ब्रह्मणि सम्यग् वाचकतयान्वयात्।"**[1]

अस्मिन् विषये श्रुति प्रमाणं वर्तते- यथा - **"यतो वा इमानि भूतानि जायन्ते"**[2]**, "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च"**[3]**, "य आत्मा अपहतपाप्मा"**[4]**, "विजरो विमृत्युर्विशोको विजिघित्सोऽपि पासः"**[5] परम्परया ब्रह्मण्येव समन्वयाच्च।

**श्रीरामनुजाचार्यस्यमते समन्वयाधिकरणस्य विमर्शः-**

समन्वयाधिकरणे एकमेव सूत्रं वर्तते- **"तत्तु समन्वयात्"** त्रिपदात्मकं सूत्रमस्ति- "तत् तु समन्वयात्"। सूत्रे आगतम् "तु" शब्दः पूर्वपक्षस्य निषेधः करोति। तत् शब्दः पूर्वसूत्रोदितं ब्रह्मणः शास्त्रप्रमाणकत्वं सिद्ध्यति। समन्वयात् शब्देन सम्यक्तया पुरुषार्थरूपेण यः अन्वयः भवति सोऽन्वयः समन्वयरिति उच्यते।

अस्मिन् सूत्रे इदं विचारः क्रियते यत् ब्रह्मणि शास्त्रप्रमाणमस्ति वा न- अस्मिन् विषये पूर्वपक्षी वदति ब्रह्मणि शास्त्रप्रमाणं न भवितुं शक्यते, यतोहि प्रर्वृत्तिनिवृत्यन्वयविरहिणो वर्तते अत एव स स्वरूपतोऽपुरुषार्थोऽस्ति। शास्त्रस्य प्रामाण्यमयमस्ति यत् स पुरुषार्थस्य बोधकः भवति।

**"यद्यपि मोक्षसाधन ब्रह्मध्यान-विधिपरत्वेऽपि, असत्यपि ब्रह्मणि तद्ध्यानविधानसंभवात्"[6],** अत एव शास्त्रस्य ब्रह्मणः सद्भावे तात्पर्यो नास्ति।

अतो ब्रह्मणः शास्त्रप्रमाणकत्वं न सम्भवतीति।

सिद्धान्तपक्षो वदति - यत्**"अतिशयितगुणापितृपुत्रादिजीवनज्ञानवत् अतिशयानन्दस्वरूपब्रह्मज्ञानस्य निरतिशय पुरुषार्थत्वात् तस्य शास्त्रप्रमाणकत्वं संभवति।"**[7] अस्मिन् विषये श्रुतिप्रमाणमस्ति - यथा- **"आनन्दो ब्रह्म"**[8] अर्थात् ब्रह्म आनन्दस्वरूपमस्ति।

**"यदेष आकाश आनन्दो न स्यात्"**[9]

अर्थात् इदं परमप्रकाशानन्दस्वरूपं ब्रह्म न भवति, चेत् **"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणैन विद्वान्।"**[10]

अर्थात् **"इत्यादिभिरनवधिकातिशयानन्दस्वरूपं ब्रह्मेति हि, प्रतिपाद्यते।"**[11] अत एव स्वेन परेण वाऽप्यनुभूयमानं निरतिशयानन्दस्वरूपमेवेति तत् प्रतिपादनपरस्यैव शास्त्रस्य पुरुषार्थरूपेण साक्षात् अन्वयोऽस्ति।

अतो यः प्रवृत्तिनिवृत्तियुक्तो भवति तस्य, तेन सह साध्यभूतफलेन सम्बन्धत्त्वात् पुरुषार्थरूपेण सम्बन्धो भवति।

**"तत् तु समन्वयात्"** इति सूत्रे तु शब्दः शङ्कानिवृत्यर्थेऽस्ति।

**सारांशः-**

अत उपर्युक्तविवेचनं दृष्ट्वा अहं वक्तुं शक्नोमि यत् अस्मिन् अधिकरणे उभयोराचार्ययोः मध्ये विरोधः नास्ति, उभावाचार्यौ ब्रह्मणि शास्त्रप्रमाणकत्वं मन्येते।

एवं भूतस्य शास्त्रसमन्वितस्य ब्रह्मणः **"सोऽन्वेष्टव्यः"**[12] **"स विजिज्ञासितव्यः, निदिध्यासितव्यः"** इत्यादिश्रुतिप्रमितेन ध्यानेन **"यमेवैष वृणुते तेन लभ्यः"** इत्यादि वाक्योक्ततदनुग्रहकृतेन **"भिद्यते हृदयग्रन्थिः"**[13] इत्यादि मन्त्रात् सिद्धं भवति यत् ब्रह्म शास्त्रप्रमाणकत्वेन सिद्ध्यतीति।

**सन्दर्भग्रन्थसूची**


1. वेदान्तकौस्तुभप्रभा, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, सरस्वती भवन पुस्तकालय सम्पादक, डॉ. विजयनारायण मिश्र, 1992
2. तैत्तिरीयोपनिषद्, गीताप्रेस प्रकाशन, गोरखपुर
3. छान्दोग्योपनिषद्, गीताप्रेस प्रकाशन, गोरखपुर
4. छान्दोग्योपनिषद्, गीता प्रकाशन गोरखपुर
5. छान्दोग्योपनिषद्, गीता प्रकाशन गोरखपुर
6. वेदान्तदीप, पृ.33, चौखम्भा सुरभारती प्रकाशन वाराणसी व्याख्याकार श्री स्वामीगोपालाचार्य, 2014
7. वेदान्तदीप, पृ.33, गीताप्रेस गोरखपुर, चौखम्भा सुरभारती प्रकाशन वाराणसी व्याख्याकार श्रीस्वामीगोपालाचार्य, 2014
8. तैत्तिरीयोपनिषद्, गीताप्रेस गोरखपुर
9. तैत्तिरीयोपनिषद्, गीताप्रेस गोरखपुर
10. तैत्तिरीयोपनिषद्, गीताप्रेस गोरखपुर
11. बृहदारण्यकोपनिषद्, गीताप्रेस गोरखपुर
12. कठोपनिषद्, गीताप्रेस गोरखपुर
13. मुण्डकोपनिषद्, गीताप्रेस गोरखपुर